हरिसं. ॥१॥

श्रीसद्गुज्ञानंदायनमोनमः॥ अथकविः सिंहासनादिवर्णनमुपक्रमते अथेति अथमंदिरादिवर्णनानंतरं त्रि सर्ग-१९
षुप्राकृपूर्वदिग्विदिग्मुखासिद्धारालियेषांतानितथाभूतानियानिमंदिराणितेषुअकृष्णेनरत्नेनविनिर्मितानि
रचितानितत्रैरुल्लतानिश्रीमंतिश्रोभायुक्तानियानिविमानानितेषांप्रतिमानंउपमानंगतानिप्राप्तानिद्युति
मंतिप्रकाशमानानिसिंहासनानिभांतिराजंतियेषामितिअदभ्रंबहुलंस्फुरत्प्रसरत्अर्जुनंशुभ्रंयदर्चिःकांति

अथत्रिषुप्राङ्मुखमंदिरेषुश्रीमद्विमानप्रतिमानमुच्चैः॥ गतामकृष्णेनविनिर्मितानिसिंहासनानिद्युतिमंतिभां
ति॥१॥ येषामदभ्रस्फुरदर्जुनार्चिर्दासीकृतक्षीरपयोनिधीनाम्॥ आभेवभासूर्ध्वमहाप्रसाराभागीरथीप्रोच्छ
लदनीरा॥२॥ भंगीप्रणद्धस्फटिकोपलानामारोहणानांमहसांसमूहः॥ यत्रस्थितोरुक्रमपादनेर्यंस्त्रिवर्त्मगा
याद्ववारिपूरः॥३॥ स्तैनदासीकृतःपराभूतःक्षीरपयोनिधिर्दुग्धसागरोयेस्तानितथोक्तानांतेषांसिंहास
नानांआभाकांतिरूर्ध्वोमहान्प्रसारःसंचारोयस्याःसाप्रोच्छलत्उच्छलत्अंचत्शुभ्रंनीरंयस्याःसातथो
क्ताभागीरथीगंगेवभातिचकास्ति॥२॥ भंगीतियत्रयेषुसिंहासनेषुभंगीभिर्विचित्ररचनाभिःप्रणद्धानिब
द्धाःस्फटिकोपलाःशुभ्रमणयोयेषुतेषांतथोक्तानांआरोहणानांसोपानानांमहसांतेजसांसमूहःआरोह ॥१॥

णांसोपानमितिसमरःस्थितायेउरुक्रमाःभगवंतस्तेषांपादाश्चरणास्तेभ्योनिर्यतीयात्रिभिर्वर्त्मभिर्गच्छती
तित्रिवर्त्मागंगातस्याःवारिपूरोजलप्रवाहइवभातीतिशेषः॥३॥ वरेंद्रनीलैरितियानिसिंहासनानिस्तंभेषुअ
वनद्धैःखचितैःप्रसरंतिमहांसितेजांसियेषांतैस्तथोक्तैःवरैरिंद्रनीलैःनृपाममणिभिःकलिंदःसूर्यस्तस्य
कन्यायमुनातस्याःऊर्मयस्तरंगास्तैर्विमिश्रितानियुक्तानिसमुज्ज्वलानिशुभ्राणिगंगापयांसिगंगाज

वरेंद्रनीलैःप्रसरन्महोभिःस्तंभावनद्धैर्विलसंतियानि॥ कलिंदकन्योर्मिविमिश्रितानिगंगापयांसीवसमुज्ज्वला
नि॥४॥ मुक्तामयानामुपर्यासनानांयानीन्द्रनीलोपलभासुराणाम्॥ लीलांवहत्कृष्णागरुपत्रभाजःसुरोचनानि
र्मितभूमिभक्तेः॥५॥ नीलोपलानांद्युतिमीयुषीणांतुषारसंपृक्तहरित्क्षितीनाम्॥ धाराधरच्छायसमावृतानांपत
त्रिणांमानसवासभाजाम्॥६॥ स्तानीवविलसंतिभांति॥४॥ मुक्तामयानामितिपुनःकथंभूतानियानिसिंहासना
निइंद्रनीलोपलैःनृपाममणिभिःभासुराणांशोभमानानांमुक्तामयानांमौक्तिकनिर्मितानांदाम्नांहाराणांलीलां
शोभांउपर्यांतिव्रजंतिकृष्णागरुमलयागरुचंदनंतस्यपत्राणिरचनाविशेषाःतानिभजंतीतितथोक्तातस्याःसु
रोचनागोरचंदनंतयानिर्मितायाभूमिःक्षितिस्तस्याभक्तिःरचनातस्यालीलांचउपयांति॥५॥ नीलोपलानामि

तिनीलोत्पलानांनीलमणीनांद्युतिंकांतिमुद्ग्युषीणांप्राप्तानांतुषारेण हिमेनसंपृक्तानांयुक्तानांहृष्टतांपाथो
रुहाणांक्षितयः भूमयस्तासांलीलामुपयांतीतिसंबंधः धाराधरामेघास्तेषांछायाधाराधरछायमूछायावाकुल
मितितिनपुंसकत्वम् तेनसमाहृतानामाछादितानांमानसेसरसिवासंभजंतीतितथोक्तास्तेषांपत्रिणांयक्षितीनां
लीलामुपयांति ॥६॥ पाथोरुहाणामितिस्फुरंतीप्रसरंतीप्रभायेषांतानितथोक्तानियानींदीवराणिनीलकं

पाथोरुहाणांतुहिनछवीनांस्फुरत्प्रभेंदीवरसंयुतानाम् ॥ प्रोत्फुल्लमंदारकमल्लिकानामुपेयुषांयु
क्तिमुमाप्रसूनैः ॥७॥ शोणप्रभाणांप्रसरत्प्रभाभिः क्वचिन्मणीनांद्युतिरन्वकारि ॥ संध्यासमासादित
वर्णभेदंधैरीयुषः शारदवारिदस्य ॥८॥

जानितैः संयुतानांयुक्तानांतुहिनछवीनांहिमशुभ्राणांपाथोरु
हाणांकंजानांलीलांउपयांतिउमाप्रसूनैरतसीपुष्पैः सहयुक्तियोगंउपेयुषांप्राप्तवतांमंदारकमल्लिकानां
तसुष्याणांलीलामुपयांतीतिसंबंधः ॥७॥ शोणप्रभाणामितिये: सिंहासनेः क्वचित्प्रदेशेशोणप्रभा
णांरक्तानांमणीनांप्रसरंसोथाप्रभुवंसोयाः प्रभाः कांतयस्ताभिः करणेः संध्ययासमासादितः प्रापितोयोवर्ण
भेदोरागभेदस्तंईयुषः प्राप्तवतः शारदवारिदस्यशरन्मेघस्यद्युतिः कांतिः अन्वकारिअनुकृता ॥८॥ ॥३॥

युग्मेनाह आबिभ्रतद्दतियानिसिंहासनानिरत्नमयंललामंभूषणंआबिभ्रतोदधतः अर्जुनोगोरोविग्रहोदे
हायस्यसतथोक्तस्तस्यसीरहलंआयुधंयस्यसः सीरायुधोबलदेवः तस्यलीलांशोभांव्रजंतिगच्छंतिअरुण
नारक्तानांविद्रुमाणांप्रवालानामर्चिषाकांत्याविभिन्नंमिश्रितंयन्मुक्तापटलंमौक्तिकसमूहस्तस्यलीलांव्रजं
ति ॥९॥ संपृक्तेतिसंपृक्तंमिलितंयत्कालेयकंकुंकुमंतेनरंजितस्तस्यनवीनंयत्कर्पूरंतस्यरजश्चूर्णयस्यपरागानि

आबिभ्रतोरत्नमयंललामंव्रजंतियान्यर्जुनविग्रहस्य ॥ सीरायुधस्यारुणविद्रुमार्चिर्विभिन्नमुक्तापटलस्यली
लाम् ॥९॥ संपृक्तकालेयकरंजितस्यनवीनकर्पूररजश्चयस्य ॥ नीताकृतिम्नस्तुहिनस्थलस्यवयोधिराजाग्रज
रश्मिजालैः ॥१०॥ एकत्रसुश्रीमतितत्रकृष्णोविराजतेकल्मषतंडनेक्षः ॥ वृंदावनेदारविहारकारीमहीपति
आत्तकरारिहंता ॥११॥

करस्यलीलांव्रजंतिचयस्यांपक्षिणामधिराजोगरुडस्तस्याग्रजोऽरुणस्तस्यरश्मिजालैः
किरणसमूहैः नीतः अरुणिमारक्तत्वंयस्यतत्तथोक्तंतस्यतुहिनस्थलस्यहिमयुक्तभूप्रदेशस्यलीलांव्रजंति
॥१०॥ कुलकेनाह एकत्रेतिस्फुटश्रीः शोभाविद्यतेऽस्येतिसुश्रीमान् तस्मिन्सुश्रीमतिरम्यशोभायुक्तेएकत्र
कस्मिन्तत्रसिंहासनेकल्मषतंडनापापभेदिनीईक्षादर्शनंयस्यसः वृंदावनेतदारामहांतोविहारास्तान्कु

हरिसं०
॥ ३ ॥

सर्ग० १९

रोतीतितथोक्तः महीपतिर्यातानृपश्रियायेसुरारयोदेवद्विषोदैत्यास्तेषांहंताश्रीकृष्णः वृंदावनविहारिनामा
श्रीकृष्णोविराजतेतेनशोभते ॥ ११ ॥ वामेतिनिरंतरंवामप्रतीकेसव्यश्रीकृष्णांगेस्थितयानिजंस्वकीयंयदास्यं सु
खंतदेवनिर्दोषः कलंकवर्जितस्तुषारमूर्त्तिश्चंद्रस्तस्मिन् नितांतमदभ्रंसक्ताविक्षिचकोरोयस्याः सातयासम्
मेतोयुक्तः ईक्ष्यः दर्शनीयः आधिंमनोव्यथांहरतीतितथोक्तः ॥ १२ ॥ प्रसुप्तेति प्रसुप्तानिखचितानिरत्नानि

वामप्रतीकस्थितयासमेतोनिरंतराराधिकयाधिहारी ॥ निजास्यनिर्दोषतुषारमूर्त्तौनितांतसक्ताक्षिचकोरयेक्ष्य
क्ष्यः ॥ १२ ॥ प्रसुप्तरत्नोपलराजिताभ्यांप्रतप्तचामीकरनिर्मिताभ्याम् ॥ सन्नूपुराभ्यामतिभासुराभ्यांसहंस
काभ्यांचरणांबुजश्रीः ॥ १३ ॥ कौशेयमसुक्त्तलतापनीयस्फुरत्प्रभंसन्मणिराजितेन ॥ कांचीकलापेनयुतंद
धानः कटीतटेश्लक्ष्णहिरण्मयेन ॥ १४ ॥ नुपलामणयश्चतैः राजिताभ्यांप्रतप्तंशोधितंयत्चामीकरंस्वर्णं
तेननिर्मिताभ्यांरचिताभ्यांअतिभासुराभ्यामतिप्रकाशमानाभ्यांसहंसकाभ्यांपादकटकसहिताभ्यांसन्नू
पुराभ्यांश्रेष्ठमंजीराभ्यांचरणांबुजयोश्चरणपद्मयोः श्रीः शोभायस्यसः ॥ १३ ॥ कौशेयमितिअतिभृशंउज्ज्व
लंयत्तपनीयंसुमेरुतापनीयंस्वर्णंतद्वत्स्फुरंतीप्रकाशमानाप्रभायस्यतत् सन्मणिराजितेनश्रेष्ठम ॥ ३ ॥

णिभासितेनश्लक्ष्णंयत् हिरण्यंतन्मयेनकांचीकलापेनकटिमेखलाभूषणेनयुतंकौशेयंक्षौमं कटीतटेदधानः
दधत्परिवीतसरत्नमेखलकौशेयइत्यर्थः ॥ १४ ॥ अंसद्वयइति अंसद्वये स्कंधद्वये अनर्घ्यं अमूल्यंविचित्रोव
र्णोयस्यतम् तयोर्विशेषणसमासः कलधौतस्यसुवर्णस्यसूत्राणियस्मिन्तत्वासोवस्त्रंदधानः स्वर्णकिरीटं
हेममुकुटंभजंतीतितथोक्ताः तेषांविमलोपलानांशुद्धमणीनांचित्राविचित्राः प्रभाः कांतयस्ताभिर्विराजितः

अंसद्वयेऽनर्घ्यविचित्रवर्णंवासोदधानः कलधौतसूत्रम् ॥ चित्रप्रभाभिर्विमलोपलानांविराजितः स्वर्णकिरीटभा
जाम् ॥ १५ ॥ रत्नोज्ज्वलस्वर्णमयांगुलीयकेयूरसत्कंकणदोर्द्वयश्रीः ॥ कर्णोल्लसत्कुंडलमंडनार्हगंडस्थलः कंज
कराग्रवेणुः ॥ १६ ॥ ग्रैवेयगुंजार्धसुगुच्छदेवछंदादिभूषार्पितनीलगात्रः ॥ रूपानुरूपातिमहोविराजत्सरस्सरस्पर्द्धि
समप्रतीकः ॥ १७ ॥
१५ ॥ रत्नेतिरत्नानिचउज्ज्वलस्वर्णंशुद्धहेमचप्रचुराणितन्मयेषुतथाभूतानांगुलीयानिकर्मिकाः
तथाभूतौकेयूरौअंगदौतथाभूतेसतीश्रेष्ठकंकणेवलयौचतेदोर्द्वयेहस्तयुग्मेश्रीः शोभायस्यसतथोक्तः क
र्णयोरुल्लसतीशोभमानेकुंडलेतयोर्मंडनार्हंशोभाविधानयोग्यंगंडस्थलंयस्यसः कंजवत् कोमलौकरौतयो
रग्रेवेणुर्यस्यसतथोक्तः ॥ १६ ॥ ग्रैवेयेतिग्रैवेयाणिकंठभूषणानिग्रैवेयकंकंठभूषेत्यमरः गुंजार्धश्रतुर्विंशति

यष्टिकोहारः सुष्टुगुच्छोद्वात्रिंशद्यष्टिकोहारः देवछंदः शतयष्टिकोहारः तेनआदयोयासांतास्तथोक्तायाभूषास्ता
भोः र्पितात्द्रत्नाजीक्षायोभायेनतन्तथोक्तं गात्रं शरीरं यस्य सतथोक्तः द्वात्रिंशद्यष्टिकोगुच्छोगुच्छार्द्धस्तत्वयष्टिकेः श
नयष्टिर्भवेद्देवछंदारकोहारउत्तम इति धरणिः भूषणाभूषणानां गइ सर्थः रूपस्यस्वशोदर्यस्यअनुरूपोयोगपाः अति
मदसाबद्धत्नतेजसाविराजंतः शोभानाः परस्परमस्मोमंस्पर्द्धिनः स्पर्द्धावंतः इवाद अस्मौंदर्याः समाप्रान्यूनाधिकत्ववर्जि

स्तीयाधरेबिंबफलोपमानेनिधायवेणुंमृदुलांगुलीभिः॥ पाणिद्वयेनाश्रितमार्गभीशोमृदुत्वसंतर्जितपल्लवेन॥१८
सप्तस्वरग्रामविमूर्छनाभिर्यथायथंसश्रुतिभिर्गतिज्ञः॥ गानंप्रकुर्वन्व्रजवल्लवीनांजहारचेतांसिमनोरमंयः॥१९

ताः प्रतीकाः अंगानि यस्य सतथोक्तः अंगं प्रतीको ऽवयवोपघन इत्यमरः गात्रं वपुः संहननं शरीरं वर्ष्म विग्रह इ
त्यमरः॥१७॥ युग्मेनतंविशिनष्टि स्वीयाधरई तिईशः सर्वनियंता गतिज्ञः स्वरगतिवेत्ता यः श्रीकृष्णः मृदुत्वेन कोमलत्वे मृ५
न संतर्जिततिरस्कृतः पल्लवोनवांकुरोयेनतत्तथोक्तं तेन पाणिद्वयेन करयुगेन बिंबफलमुपमानं यस्य तस्मिन्
स्वीयाधरे निजोष्ठे मृदुलांगुलीभिः कोमलांगुलीभिः आश्रिता मार्गाः स्वरनिर्गमनरंध्राणि यस्य स तं तथोक्तं वेणुं
निधायधृत्वा॥१८॥ सप्तेति श्रुतयः स्वराणां भवान्तरयवाः श्राव्यविशेषास्ताभिः श्रुतिसंख्यानियमे देवलः श्रुतिसंख्या ॥४॥
सहवर्त्तमानाभिस्ताभिः

चतुश्चतुश्चैवषड्जमध्यमपंचमाः द्वेद्वे निषादगांधारौ त्रिस्त्रिर्ऋषभधैवतौ विंतिसप्तयेस्वराः श्रुत्यारब्धानुरणनात्म
काः तदुक्तं संगीतरत्नाकरे श्रुत्यनंतरभावी यः स्निग्धोनुरणनात्मकः स्वतोरंजयति श्रोतृचित्तं सस्वर उच्यते
षड्जादयः स्वराः तदुक्तं श्रुतिभ्यः स्युः स्वराः षड्जर्षभगांधारमध्यमाः पंचमो धैवतश्चाथ निषाद इति सप्त ते इ
ति तेषां संज्ञाः सरिगमपधनी सप्तरागग्रामाः स्वरसंघातभेदाः मूर्छनाः स्वरारोहावरोहक्रमभेदाः ताभिः करणे
र्यथायथं यथास्वं असंकीर्णरूपमित्यर्थः यथास्वेयथायथमिति निपातनात् द्विर्भावोनपुंसकत्वं च अस्व
नपुंसके प्रातिपदिकस्येति ह्रस्वत्वं ह्रस्वत्वं मनोरमं मनोहरं गानं प्रकुर्वन्सन् व्रजवल्लवीनां व्रजस्थाभीरयुव
तीनां गोपे गोपाल गोसंख्य गोधुगाभीर वल्लवा इत्यमरः चेतांसि मनांसि जहार स्वायत्तानि चकारेत्यर्थः॥ अथ
ग्रामलक्षणं यथा कुटुंबिनः सर्वेप्येकीभूताभवंतिहि॥ तथा स्वराणां संदोहो ग्राम इत्यभिधीयते॥१॥ षड्ज
ग्रामो भवेदादौ मध्यमग्राम एव च॥ गांधारग्राम इत्येतत् ग्रामत्रयमुदाहृतम्॥ तथा नंदावर्त्तो ग्रजीभूतः ष
ड्जोग्रामकाश्रयः॥ षड्जमध्यमगांधारास्त्रयाणां जन्महेतवइति मूर्च्छालक्षणमुच्यते॥ क्रमात्स्वराणां स
प्तानामारोहश्चावरोहणम्॥ सामूर्छेत्युच्यते ग्रामस्था एताः सप्तसप्त च॥१॥ ग्रामत्रयेपि प्रत्येकं सप्तस
प्तमूर्छा इत्येकविंशतिमूर्छा भवंति तन्नामानि त्वनपेक्षितत्वान्नोक्तानीति सर्वमवदातं ॥१९॥

हरिसं· ॥५॥ आनंदयन्निति शुभैर्मंगलैः विहारैः क्रीडाभिः अनंगस्य कामस्योत्सवहूतः सौंदर्यातिशयात्सर्वविजयिनमपि सर्ग·१९
कामं पारवनूपतां नयंत इत्यर्थः तथोक्तायेप्रतिका अंगानि तैर्भक्तजनान् आनंदयन् हर्षयन् माल्यानां पुष्पाणामव
चूला माल्यास्तेषामावलिः पंक्तिः यस्मिंस्तत्तथाभूतं विनूतालं विस्तीर्णं वक्षो यस्य सतथोक्तः कलापिनो मयूरस्यब
र्हालिपिच्छानि तेषामावलिः पंक्तिस्तयानूतालीनो भ्रमानो मौलिः किरीटो यस्य सतथोक्तः चेतांसि तत्र हारेति पूर्वे
ण संबंधः ॥२९॥ हरिकृष्णपद्धतिरिति अमलानि शुद्धानि अंतराणि मनांसि येषां ते तथोक्तास्तेषु प्रियाय स्य सः

आनंदयन् भक्तजनान् विहारैः शुभैरनंगोत्सवहूतस्तीकैः ॥ माल्यावचूलालिविनूतालवक्षाः कलापिबर्हावलि
नूतालिमौलिः ॥३०॥ हरिकृष्णपद्धतिरमलांतरप्रियः परमावदात रमणीयविग्रहः ॥ निवसत्सदघौघनाशनस्तदं
तिके पुरुषोत्तमो गुणनिधिर्दयालयः ॥३१॥ परमत्युत्कृष्टोऽवदातः शुद्धो रमणीयः सुंदरो विग्रहो मूर्त्तिर्यस्य सः
अघौघनाशनः पापसमूहविनाशकः गुणानां सत्यशौचादीनां निधिः दयाया आलयो मंदिरं पुरुषाः अक्ष
राख्याः पुमांसस्ते इति स्कंदोक्तात् अक्षरपुरुषास्तेषु उत्तमः उत्कृष्टः हरिकृष्णपद्धतिर्नामयस्य सः ह
रिकृष्णनामा भगवान् तदंतिके तस्य वृंदावनविहारिनाम्नः श्रीकृष्णस्य अंतिके समीपे निवसति ॥३१॥ ॥५॥

भवेति शुभं मंगलं भवः संसारः स एव दावो वनानलस्तेन परितप्तानि चेतांसि येषां ते तथोक्तास्तेषां जनानां अ
तिनूर्मदम् अतिसुखदात् मणिमुक्तानिर्यानि भूषणानि मंडनानि तेषामाभरणं भूषणं यस्य सोभयाभूष
णः इत्यर्थः आश्रितानामंतराणि मनांस्येव मिलिंदा भृंगास्तैः सेवितं जुष्टं यस्येति शेषः हरिकृष्णस्य अंघ्रिपद्म
योश्चरणकमलयोर्युगं युगलं श्रुतिभिर्वेदैः ईड्यते स्तूयते ॥३२॥ विधीति विधिर्ब्रह्मा विष्णुः शंकरः शिवश्चते

भवदावदग्धपरितप्तचेतसाम् अतिशर्मदं श्रुतिभिरीडितं शुभम् ॥ मणिभूषणाभरणमंघ्रिपद्मयोर्युगमाश्रितांतर
मिलिंदसेवितम् ॥३२॥ विधिविष्णुशंकरमुखाः पदांगुलीनखदर्पणावलिषु निर्जरेश्वराः ॥ अवलोकयंति विमलो
पलउज्ज्वलन्मुकुटाननानि विनयानता मुहुः ॥३३॥ समभावमत्री तव कृनापि यत्तमो न विभेत्तुमात्ममहसा महीय
सा ॥ अपनीयते खिलजगत्प्रकाशिना द्युरतिक्रमं तदपि यन्नखेंदुना ॥३४॥
मुखानि मुख्या येषां ते तथोक्ताः नि
र्जराणां देवानामीश्वराः अधिपतयः यस्य श्री हरिकृष्णस्य चरणस्यांगुलयस्तासां ये नखास्त एव दर्पणानि मुकुराणि ते
षामावलयः पंक्तयस्तासु विमलाः शुद्धा ये उपला मणयस्तैरुज्ज्वलंतः प्रकाशमाना ये मुकुटा मौलयस्तैर्युतानि
तथोक्तानि यानि आननानि मुखानि विनयानताः संतो मुकुरवलोकयंति वीक्षंते ॥३३॥ समभावीति अखिलं ज

हरिसं·
॥६॥

गत्प्रकान्नाप्यतीति तथोक्तेन अन्नीतानुदमावसवः किरणायस्यसतेन सूर्येणापिचसुर्ह्देशेरन्नोचवसुतो सर्ग·१८
येथनेमणाविति विवेत्तयंती महीयसामहन्तरेणापि अात्ममहसास्वतेजसायत्तमः विभेत्तुं विनानाप्यितुंनस
मभाविनन्नोकेक्रुरतिक्रमंक्ष्नुः खेनोद्धंघ्यंतदपिज्ञानरूपंतमोपियस्यचरणस्ययोनखः सएवरंद्रुश्चंद्रुस्तेनअ
पनीयतेनिराक्रियते ॥२४॥ परितापयंतीति विधुवीक्षणाच्चंद्रावलोकनात् हिरण्यरेतसोवक्रयः चकोरपक्षिण
इवयंपदनखचंद्रंस्मरतोजनान् कुसुमानिपुष्पाण्येव आशुगानांबाणानामासनंधनुर्यस्यसकामः स्मयोग

परितापयंतिनचकोरपक्षिणोविधुवीक्षणादिव हिरण्यरेतसः ॥ स्मरतोयमेवकुसुमाशुगासनस्मयलोभमा
नमुखवैरिवक्रयः ॥२५॥ पृथुतेजसंयमवचिंतयन्नपरंभ्रमामेतिनंदथुमिवांभसांनिधिः ॥ अवलोक्यनीत
किरणंनवोदयंभवकालभीतिविनिवारणक्षमम् ॥२६॥ वेधूलोभस्मयमानस्मृतेमुखानिमुखायेषांतेतथा
भूतायेवैरिणोंतःशत्रवस्तएववक्रयोकुलानानाः नपरितापयंतिनदाहयंसेव ॥२५॥ पृथुतेजसमितिपृथुवि
स्तालंतेजोयस्यसतंपरंश्रेष्ठंभवः संसारः कालस्तत्ताभ्यांभीतिर्भयंतस्याविनिवारणंनिवर्त्तनंतत्रक्षमःसम
र्थस्तंतथोक्तंयंनखचंद्रं अवचिंतयन्स्मरन्जनः नवउदयोयस्यसतंनीतकिरणंहिमरश्मिंचंद्रं अवलोक्य ॥६॥

अंभसांजलानांनिधिः समुद्रइवभ्रमामसंतंनंदथुं आनंदंक्षितोश्नुतेतिनंदतेर्भावेथुप्रत्ययः एतिप्रा
प्नोति ॥२६॥ सरिदितियस्यश्रीहरिहरमचरणस्य अवनेजनंक्षालनंतस्माद्धवतुद्भवस्तत्सनिर्यस्याः सातथोक्ता अ
तएवउत्तमासर्वस्त्रोतस्विनीश्रेष्ठासरितगंगा अखिलंसमग्रंजगत्तुविश्वंअपेतानिगतानिपातकानियस्मा
त्तत्तथाभूतंकुरुतेयस्यदसंबंधात्सर्वंजगदघौघनिरासिनीगंगाजातेत्यर्थः अत्राद्यतारावुत्तारिणोरभेदविव
क्षामभिप्रेत्योक्तम् तुहिमरश्मिश्चंद्रस्तेननालिनाराजताशिरसामूर्ध्नायस्यः गंगाजलंदधत्त्रिवोपित्रि

सरिदुत्तमायदवनेजनोद्भवाकुरुतेखिलंजगदपेतपातकम् ॥ त्रिदशांत्रिवोपिसमवापयस्यःशिरसादध
त्तुहिनरश्मिनालिना ॥२७॥ उपलभ्ययद्रसमनन्यसन्निभंहृदिकामयंतिनविपत्सदंमखम् ॥ यतयोतरम
रणरीणाद्धषणंनलिनाक्षिवाम्पदगुणंनलीमुखाः ॥२८॥ उतांमंगलतांसमवापअसधिकस्कत्वतांप्रापे
सर्थः ॥२७॥ उपलभ्येति अंतरेमनसिस्मरणंचरणस्मृतिस्तेनरीणानिविनष्टानिदूषणानियेषांतेतथोक्ताः
यतयोयोगिनः अमेनतुल्योनभवतीतिलंतथोक्तं अस्यपदविग्रहत्वान्निःसमासोयमुपस्यश्रीहरिहर
मचरणस्यरसंमाधुर्यंउपलभ्यप्राप्यन्नालीमुखाः भृंगाः नलिनात्कमलात् अन्यत्अन्यगुणंस्कंधंवगुणव

॥१॥ र्जितमिव विपदां दुःखानां पदं स्थानभूतं स्फुरत्त्वं प्राकृत स्फुरत्त्वं हृदि मनसि न कामयंति नेच्छंति ॥३८॥ द्रुहिण 
इति द्रुहिणो ब्रह्मायत श्रीहरिक्रमचरणं समर्च्य पूजयित्वा ब्रह्मात्मभूः स्याद् द्रुहिणो द्रुघण स्त्रपितामह
इति भागुरिः जगतो विश्वस्य उद्भवक्रियानुसत्क्रियालस्यां पटुतां समर्थतां प्रपेदे प्राप हरिर्विष्णुः तदीयपरि
रक्षणे तस्य जगतः संबंधि यद् अवनं रक्षणं तत्र त्रिविक्रमः प्राप विषमेक्षणः त्रिचक्षुः अखिलं सर्वं अंडं जगत्

द्रुहिणः समर्च्य जगदुद्भवक्रियापटुतां तदीयपरिरक्षणे हरिः॥ यदवाप तत्र खलु किं प्रतिलब्धवांडनात्रिनेत्रो
विषमेक्षणस्त्रिभुवनैकदानं बलिः ॥३९॥ विविधोपलस्फुरितकांतिभास्कर द्युतवातकुंभमयमे
खलान्वितम्॥ दधदुज्ज्वलकान्तमलरुक्मभास्वरं वसनं स चारुकटिमंडलेऽरुणम्॥४०॥ ॥

तस्मात् त्रिनेत्रः किं प्रवाप बलिर्वैरोचनः त्रिभुवनानामिंद्रतां तां प्रवाप ॥३९॥ युग्मेनाह विविधेति विविधा
नानाविधा ये उपला मणयस्तैः स्फुरिता प्रकाशमाना या कांतिः तया रञ्जिता भासिता या द्युतः शातकुंभं स्वर्णो धि
तस्य वर्णं तन्मयामेखलानया अन्वितं युक्तं अमलं शुद्धं पतद् रुक्मं स्फुरद्वर्णं तेन भास्वरं शोभमानं स्वर्णसूत्रयुक्तमि
त्यर्थः अरुणं रक्तं चारु यत् कटिमंडलं तस्मिन् वसनं वासः दधत् स श्रीहरिक्रमः उज्ज्वलकान्तिर्विभाति ॥४०॥ ॥१॥

ललितमिति विशुद्धं यद्वृत्तं कनकं तस्य सूत्राणि तैरगत्तितं भासितं ललितं रम्यं दृहतं महत् उन्तरीयं प्रावरणं द
धत् संव्यानमुत्तरीयं स्यात् चोलः कूर्पासको स्त्रियामिति अमरः अविरं शुचिर्विद्युत् भास्वरं प्रकाशमानं तत्तमात्मानं
पुष्णाणां शेखरायस्मिंस्तत् मणिरत्नमौक्तिकानां मनोज्ञानि कंकणानि निर्झरसखराय स्मिंस्तत् वरवेष्टने श्रेष्ठे दोर्मीषं
दधत् ॥४१॥ रुचिरेति रुचिरैः रम्यैः यो प्रवेष्टे भुजौ तयोर्वलयेकंकणे ऊर्मिका अंगुलीयका नि अंगुलीयकम्

ललितं विशुद्धवसुसूत्रगत्तितं दृढमुत्तरीमचिरांशुभास्वरम्॥ वरवेष्टनं निरसिपादमनोरुखरं मणिरत्नमौक्तिकमनो
ज्ञकंकणम्॥४१॥ रुचिरप्रवेष्टवलयोर्मिकांगदः कुसुमावतंसविलसच्छ्रुतिद्वयः॥ परिमंडयन् कनककम्रकुंड
लेशुभगंडमंडलमनोरमश्रिया॥४२॥ स विभाति दीर्घमृदुसाम्यसंयुता वरवक्षसा बकुलधामनालिना॥ दधदच्छ
मौक्तिककलापमुत्तमं विपदंतकारिणमिवोज्ज्वलं वृषम्॥४४॥ ऊर्मिके समरः अंगदे केयूरे चते यस्य सः कुसु
मानां पुष्पाणाम् अवतंसो कर्णपूरैस्ताभ्यां विलसत् राजत् श्रुतिद्वयं कर्णयुगं यस्य सः भुजबाहुप्रवेष्टो दोरिसम
रः कनकस्य स्फुरद्वर्णस्य कम्रे रम्ये कुंडले शुभौ मनोहरौ यो गंडौ तयोर्मंडलं तस्य मनोहरया श्रिया शोभा तया मंडय
न् भूषयन् स विभातीति शेषः ॥४३॥ स इति दीर्घे मृदु कोमलं च समं समत्वं तेन संयुता युक्तेन बकुलं यत् धाम

तेजः तेनन्नालिनराजतावरवक्षसा श्रेष्ठभुजांतरेण उत्तमं श्रेष्ठं अत्रानि निर्मलानियानि मौक्तिकानि तैर्यो क
लापो भूषणं विदाङ्कः रवानामतं तनान्ना करोतीति तं तथोक्तं भगवद्भामव्यापकतयासंस्मृतिकेत्राहारिणमिसर्थः
उत्त्वलंस्तुरुं दृषंएकांतिकधर्ममिवदधत् सः श्री हरिर्हृदये विभातिविराजति ॥२३॥ विपुलेति विपुलेविस्तृते
आयतेदीर्घे ईक्षणेनेत्रे यस्य सतंअवेक्षणं दर्शनं तेनचितोयोगपस्तं श्रितायेजीवास्तेषांजातः समूहः तस्य सकलाः
समग्राः आधयोमनोव्यथास्तेषां भेदिनम् विनाशकं यं श्रीहरिहृदयंअवलोक्य निरीक्ष्यदेहिनः आप्नुवंती

विपुलायतेक्षणमवेक्षणेचितं श्रितजीवजातसकलाधिभेदिनम् ॥ अवलोक्यचेत्रमिवयांतियंगताः स्थिर
तांसमाधिमधिगम्यदेहिनः ॥२४॥ कुत्लकंकिसलयमृदुदीर्घदक्षपाणौधृतवतिभास्वरचारुचित्रयष्टिम् ॥ भ
गवतिहरिहृदयदृश्यगोत्रेनिवसतु मेतरलोमनोमिलिंदः ॥२५॥ अम् लेखमतां चित्रतां गताङ् तिन्नोषः गताङ्कचि
त्रमस्ताङ्केस्यर्थः समाधिंअधिगम्य प्राप्यस्थिरतांनिश्चलतां यांतिव्रजंति ॥२४॥ संप्रतितत्ररतिंप्रार्थयते कि
सलयेति किसलयः पल्लवस्तस्मादपिमृदुः कोमलोदीर्घः आयतः दक्षोदक्षिणोयः पाणिः करः तस्मिन् ॥
भास्वराप्रकाशमानाचारुः रम्या चित्रं यायष्टिर्यः तांधृतवति बिभ्रतिहरिहृदयदृश्यगोत्रनामयस्य सतं 



स्मिन् तथोक्ते भगवतितरलश्चंचलोमेममम्मनो मिलिंदो मानस भ्रमरो निवसतु ॥२५॥ श्रितेति श्रितस्तूर्णंशीघ्रं श्रिता
येजनास्तेषां भवात् संसारसमुद्रात्तारणं तस्मै कटितदेहदयथातथा स्फुटवासोपवन्त्रं अवबध्य स्थितवतिकरुणा
युक्ताः कटाक्षमोक्षाः अपांगवीक्षणानियस्य सतस्मिन् शुभामंगलरूपाः रुचिराः रमणीयाः अवयवाः करचरणा
दयगानियस्य सः ईक्षणीयं दर्शनीयं रूपंयस्य सः तयोर्विशेषणसमासः ॥२६॥ उपरितनेति उपरितनंकंचुकोपरि

श्रितजनभवतारणायतूर्णं दृढमवबध्यकटीतटेस्फुवासः ॥ स्थितवति करुणाकटाक्षमोक्षे शुभरुचिरावयवेक्षणी
यरूपे ॥२६॥ उपरितनवरांबरातिभास्वन्नवनवकंचुकभंगिभासमाने ॥ मनसिजविजनिवार्यशक्तिभ्रकुटिस्फसेव
कभुग्नचारुचापे ॥२७॥ स्फुटपलवदनर्घ्यकंबभूषास्फलतिमौक्तिकहारहारिकंवे ॥ अतितरायरमणीयतास्पदास
द्युतिजितशारदपूर्णशर्वरीशे ॥२८॥
स्थितंयदुरांवरंश्रेष्ठवासस्तेन अतिभास्वंसोऽतिप्रकाशमानाः नवनवाः नव
प्रकारणाः कंचुकस्यवारवाणस्य कंचुकोवारवाणो ऽस्त्रीसमरः भंगयः कांतिस्फुरणानि ताभिर्भासमाने शोभमाने
मनसिजः कामस्तस्य विजयः पराभवस्तस्मिन् अनिवार्या अप्रतिरोध्या शक्तिर्यस्य तन्तथाभूतं भ्रकुटिरेवस्फेव कं
अतिनीलेभुग्नंवक्रं चारुरम्यं चापं धनुर्यस्य सतस्मिन् ॥२७॥ स्फुटपलेतिसंतः श्रेष्ठाश्चपलाप्रमणयो यासुतास्त

थाभूताः अनर्घाः अमूल्यायाः कंठभूषाः कंठभूषणानि कलकलिताः रम्यायेमौक्तिकहारास्तैर्हारी मनोहरः कं
ठोयस्यसतस्मिन् अतिनायाबकुलायारमणीयताचारुतातस्याः आस्पदंस्थानभूतंयद्वास्यंतस्यद्युतिः कां
तिः तयाजितःपराभूतः शारदः शरत्कालीनः पूर्णः समग्रकलासंपन्नोयः शर्वरीशोरजनीशश्चंद्रोयेनसतथो
क्तस्तस्मिन् ॥३८॥ प्रहसतीतिजनतानांजनसमूहानां इंगितानिहृद्गताभिप्रायास्तेषामवबोधोवेदनंयस्यसतस्मिन् अतएवश्रितानांहृदयेषुप्रणयेनस्नेहेनयाआर्द्रताकोमलतातांविलोक्यहृष्टःप्रहसतिहास्यंकुर्वति

प्रहसतिजननेत्रे इति तावबोधेश्रितहृदयप्रणयार्द्रतांविलोक्य ॥ जनयतिधृतमंडनेषुलीलांसदवयवस्थिरया
श्रियायुगपदाम् ॥३९॥ गतविषयसुखाभिलाषचित्तेर्गुणगणगीतिपरायणैरसंख्यैः ॥ नितचरणरतैर्विचिं
समानेजनहितकारिभिरक्षरारत्नमुक्तैः ॥४०॥
संतः श्रेष्ठायेअवयवाः अंगानितेषुस्थिरयानिश्चलयाश्रिया
धृतानियानिमंडनानिभूषणानितेषुयुगपत्एककालंलीलांशोभांजनयतिप्रादुर्भावयतिस्वप्रतीकानवधिका
तिशयसौंदर्येणालंकारानपिभूषयतीत्यर्थः ॥३९॥ गतविषयेतिगतः विषयाणांपंचविषयाणांसुखाभि
लाषः इच्छायेभ्यस्तानितथाभूतानिचित्तानियेषांतेतथोक्ताः गुणानांश्रीहरिविजयगुरुगुणानांयेगणाः समू ॥९॥

हास्तेषांगीतिर्गानंतदेवपरमुत्कृष्टमयनंआश्रयोयेषांतेतथोक्ताः सततंभगवद्गुणवर्णनतत्परैरित्यर्थः नि
तौस्वकीयौयौचरणौतयोः रतैरनुरक्तैः जनानांहितमाप्तंतिकश्रेयोलक्षणंकुर्वंतीतितथोक्ताः असंख्यैः अ
क्षरारत्नमुक्तैरक्षरनामसमुक्तैः विचिंसमानेध्यायमाने ॥४०॥ कृतवतीति अवलोकनतोनिजदर्शनेनस्वस्य
दिनमलौकिकंयत् रूपंमूर्त्तिसौष्ठवंतस्मिन् द्रुतंशीघ्रं जनतानांजनसमूहानांअप्रसूतांचाणानांचित्तानांच
रोधंस्थिरीकरणंकृतवतिविदधतिनमंतोनमस्कुर्वंतोयेअप्रस्कभृतः प्राणिनस्तेषामुदस्तः प्रणाशितःपंक

कृतवतिजनताक्षचित्तरोधंद्रुतमवलोकनतः स्वदिव्यरूपे ॥ नमदसुभृद्दुदस्तपंकयुगेजगाद्भुदयस्थि
तिविधिवादिलीले ॥४१॥ दधतिशुभवराभयेयुगेनविजितकुशेशयमार्दवेनदोष्णोः ॥ अगणितनाशरणागता
पराधेपरनिजशर्मरतेः द्वितीयमूर्त्तौ ॥४२॥
पूगः पापसमूहोयेनसतस्मिन् जगतामुदयः उद्भवः स्थितिः पा
लनंविलयोनाशस्तेआदयोयासांतास्तथाभूतालीलायस्यसतस्मिन् ॥४१॥ दधतीतिविजितंकुशेशयंकमलस्यमार्दवंकोमलत्वंयेनतत्तथोक्तेनदोष्णोः करयोर्युगेनशुभामंगलरूपोयोवरः अभयंचतेदधति वि
भ्रतिअगणिताः दंडदातृत्वेनसंख्याताः शरणागतानांपूर्वकृतेनोरूपाः अपराधायेनसतस्मिन् परमुत्कृ

र्हं निजं स्वकीयं यत् त्वार्मदिम्रानम्प्रसाधारणानवधिकानिनुायस्फखंतस्मिनुरतेः स्वलः पूर्णकामवतीसर्थः
नास्तिद्वितीयासहक्त्रीयस्याः सातथाभूतामूर्तिर्यस्यसतस्मिन् ॥४३॥ अपचितचरणइतिपरतनेर्मायायाः
परतरेपरतरेद्युतीनां कांतीनां निधानेस्थाने अक्षयपविनात्रिस्फखंयस्मिंस्तन्तथोक्ते अक्षरेतदाख्येपर
मपदेतत्त्वरूपमधाम्नि अक्षरेणसाम्यं साहचर्यं समुपगतैः प्राप्तैः अक्षरवन्निर्दोषैरित्यर्थः मुक्तानांवारैर्व्र
जैः प्रणयेनस्नेहेन अपचितौ पूजितौ चरणौयस्यसतस्मिन् ॥४३॥ विमलेतिविमलंशुद्धं हृदयमंतः करणं

अपचितचरणौक्षरेणसाम्यंसमुपगतैः प्रणयेनमुक्तवारैः ॥ परइतिपरतरेक्षरेनिधानेपरमपदेक्षयधाम्नि
णिद्युतीनाम् ॥४३॥ विमलहृदयभक्तदीयमानंफलजलकंदलाद्युपाददाने ॥ श्रितजनविहितावने
नवद्येशुभदृषवंत्रापयोजनुर्वजेने ॥४४॥
यस्यसतथाविधोयोभक्तस्तेनदीयमानंदत्तंफलंनालिकेरादि
जलंकंदानिवनस्पतिमूलानिचदलानितुलसीपत्रादीनितथोक्तानितानिआदीनियस्मिंस्ततथाभूतंवस्तु
इतिशेषः ततउपाददानेहृपयांगीकुर्वाणे श्रितजनानांविहितंकृतमवनंरक्षणंयेनसतस्मिन् अनवद्येनिखि
लदोषवर्जितेशुभोमंगलरूपोयोवृषवंत्राः धर्मवंत्राः सएवपयोजनुर्वजैः कंजनिकरः तस्मइनेसूर्ये ॥४४



कुलकंमध्यस्थितइतिमध्येउभयोः सिंहासनेयोरंतरेवर्त्तमानेतत्रतस्मिन् सिंहासनेसमर्चनीयपूजनीयः किंकु
वानिकुत्सानियानिकैरवाणिकुमुदानितद्वत्कांतारम्याकीर्त्तिर्यस्यसः वलक्षकीर्त्तिरित्यर्थः निष्पंकंनिष्पापं
यत्पुण्यकुलंधर्मकुलंतदेवकैरवकाननंकुमुदवनंतस्यइंदुश्चंद्रः लक्ष्म्यासमाश्रितंमनोहरंवामंपार्श्वंयस्यसः ना
रायणोवसति ॥४५॥ विभ्रदितिविनिर्जितंनवांकुरस्यपल्लवस्यसौकुमार्यंमार्दवंयैस्तैस्तथोक्तैः द्विरेमायिकैः

मध्यस्थितेवसतितत्रसमर्चनीयोनारायणोविकचकैरवकांतकीर्त्तिः ॥ निष्पंकपुण्यकुलकैरवकाननेंदुर्लक्ष्मी
क्ष्मीसमाश्रितमनोहरवामपार्श्वः ॥४५॥ विभ्रद्विनिर्जितनवांकुरसौकुमार्यैर्दिव्यैश्चतुर्भिरतिसारमहोनिधा
नैः ॥ हस्तैर्गदादरथांगवरांबुजानिपद्मासनादिपरिणीतगुणप्रतानः ॥४६॥ वृन्दालयेविहितवानुचरराज
धानीवेधः प्रमुखममरुदीश्वरसेवनीयाम् ॥ वंदारुभक्तजनताहृदयेष्टपूर्त्तौकल्पागमोनिखिलभव्यकुलावतंसः
४७॥
अतिअसितंसारंबलंमहः तेजस्तयोर्निधानैः चतुर्भिः हस्तैः गदादरः शंखश्चरथांगवरंचक्रंच अंबुजंक
मलंचतानिबिभ्रत्दधत् पद्मकंजंआसनंयस्यसः पद्मासनोब्रह्मासआदिर्येषांतेतैः परिणीतोगुणप्रता
नोगुणविस्तारोयस्यसतथोक्तः ॥४६॥ वृन्दालयमितिवृन्दालयवेधाः विधिप्रमुखोयेषांतेतथोक्तायेम

॥११॥ कृतां देवानामीश्वरास्तैः सेवनीयां तेष्वत्र तदवलोकनार्थमायांतीत्यर्थः राजधानीं तद्रूपं विहितवान् कृतवान्
वृंदारवानमंसोयाभक्त जनताभक्तसमूहास्ते षुदपेष्टं वांछितं तस्य पूर्त्तौ पूरणे कल्पागमः कल्पतरुः
निलंसर्वेभ्यकुलं योगिकुलं तस्य अवतंसः कर्णपूरः भूषणभूत इत्यर्थः ॥ ४५ ॥ अष्टापदेति अष्टापदं
स्वर्णं तद्वत् द्युतिः कांतिर्येषां तानि तथाभूतानि वराणि श्रेष्ठानि अंबराणि वासांसि यस्य सः भास्वराणि
प्रकाशमानानि अंगानि यस्य तथा सः राजन् दृढतम महान् यः कटः श्रोणि

अष्टापदद्युतिवरांबरभास्वरांगो राजद्दृढत्कटगसारसनावभासी ॥ स्वर्णोपलश्रवणवेष्टनदीप्तरो
चिर्दिद्योतितामलललामकपोलपालीः ॥ ४६ ॥

फलकं तं गच्छतीति तथाभूतं यत् सारसनं मेखला तेनावभा
सत इति तथोक्तः कटो नाम श्रोणिफलकमिति अमरः कांचीसारसनं चाथ पुंस्कटो ना श्रोणिफलकं त्रिष्विति अमरः स्वर्णं कनकं
उपलामणयस्तैः रचितैः रचितेयेश्रवणवेष्टने कुंडले कुंडलं कर्णवेष्टनमिति अमरः तयोर्यत् दीप्तं रोचिः कांतिः ते
न विद्योतितो ज्वलितो अमलो युक्त्या ललामभूषणभूतो यो कपोलौ तयोर्लौ शोभा यस्य स तथोक्तः ॥ ४७ ॥११॥

संकल्पेति संकल्पैर्लब्धं बलं येन सः तथोक्तो यो मात्सर्यरासनः कुसुमचापः कामः स एव उग्रो भयंकरो योदा
वानलस्तेनाकुलितानि व्याकुलानि मानसानि येषां ते तथोक्ता ये जीवास्तेषां सिंधुः समुद्रः तद्वन्निर्वापयिते
त्यर्थः एनसां पापानां चयः समूहः तस्य क्षपणं निर्वहणं यस्मात् तत्तथाभूतं श्रवणं यस्य तत्तथाभूतमभिधा
नं यस्य स तथोक्तः पद्मावत्याः क्षेमापूरणयेन स्नेहेन लालिते सेविते पादपद्मे चरणकमले यस्य स तथोक्तः ॥
४८ ॥ प्रालंबिकेति प्रालंबिकाः स्वर्णकृता ललंतिका मधिभूषाः ललितारम्या भास्वराः प्रकाशमानाः सूत्रिका

संकल्पलब्धबलमात्सर्यरासनोग्रदावानलाकुलितमानसजीवसिंधुः ॥ एनश्चयक्षपणसंश्रवणाभिधानः पद्
मावतीप्रणयलालितपादपद्मः ॥ ४९ ॥ प्रालंबिकाललितभास्वरसूत्रिकाभिर्गुच्छार्द्धमाणवकगुच्छमुखैर्लला
मैः ॥ पादांगदद्युतिपदः परिरोचमानः स सारसिद्धार्यधरबंधुरपंचबाणः ॥ ५० ॥ मौक्तिकरचिताउरः सूत्रिका
श्चाललंतिकास्ताभिः ग्रैवेयकं कंठभूषा लंबनं स्यात् ललंतिका स्वर्णैः प्रालंबिकाथोरः सूत्रिका मौक्तिकैः कृ
तेत्यमरः गुच्छार्द्धश्चतुर्विंशतिर्यष्टिको हारः माणवको विंशतियष्टिको हारः अर्द्धहारो माणवक एकावल्येक
यष्टिके समरः गुच्छो द्वात्रिंशद्यष्टिको हारः ते मुख्यानि मुख्यानि येषां तानि तथोक्तैः ललामैर्भूषणैः परिरोच

मानः शोभमानः पादांगदयोर्नूपुरयोर्द्युतिः कांतिर्ययोस्ते तथाभूते पदे यस्य स तथोक्तः पादांगदं तुलाको
टिर्मंजीरो नूपुरोऽस्त्रियामिति अमरः संतः पारिहार्याः प्रकोष्ठाभरणानि तैर्वाधरो धारको बंधुरो रम्यो पंचशाखो
पाणी यस्य स तथोक्तः पंचशाखः शयः पाणिरित्यमरः ॥५०॥ उन्निद्रेति उन्निद्रं प्रफुल्लं सारं श्रेष्ठं नवं नूतनं शा
रदं शारत्कालिनं यत् पुंडरीकं कमलं तस्य पत्रं तद्वदायतं दीर्घमक्षियुगलं नेत्रयुगलं यस्य स तथोक्तः रम
णीयं रूपं यस्य सः संपूर्णः समग्रकलासंपन्नः शारदः शारत्कालीनः कलंकेन विहीयमानस्त्यक्तो यः प्रा

उन्निद्रसारनवशारदपुंडरीकपत्रायताक्षियुगलो रमणीयरूपः ॥ संपूर्णशारदकलंकविहीयमानप्रालेय
रश्मिवदनस्तिलपुष्पनासः ॥५१॥ बोधिद्रुमोपदलतुंदविराजमानगंभीरवर्त्तुलमनोहरनाभिकूपः ॥ कर्णो
ल्लसत्कुसुमनिर्मितकर्णपूरो व्यूढोन्नतायतभुजांतरकंबुकंठः ॥५२॥ लेयरश्मिर्हिमकरश्चंद्रस्तद्वद्वदनं मु
खं यस्य सः तिलपुष्पवत् नासा यस्य सः ॥५१॥ बोधीति बोधिद्रुमस्य पिप्पलस्येदं दलं पत्रं बोधिद्रुमस्थलद
लः पिप्पलः कुंजराशनाश्वत्थ इत्यमरः तद्वत् तुंदं उदरं तत्र विराजमानो गंभीरो निम्नः वर्त्तुलो वृत्तः मनोहरः तथा
भूतो नाभिकूपो यस्य सः कर्णाभ्यामुल्लसंतो विराजंतो तु कुसुमनिर्मितौ पुष्परचितौ कर्णपूरौ यस्य सः व्यूढं वि ॥१३॥

शालं उन्नतं तुंगं आयतं दीर्घं भुजयोरंतरं वक्षो यस्य सः कंबुवत् कंठो यस्य सः स चासौ स चेति ॥५२॥ आस
इतिमहतामपि अर्चनीयौ पूजनीयौ चरणौ यस्य स तथोक्तः करुणाया निधानं स्थानं दिव्या अलौकिका
आकृतिर्मूर्तिर्यस्य सः उदस्ता निरस्ता अनमतां अनतानां आर्त्तिः पीडा येन सः सौंदर्यं प्रसर्गं सुलक्षणालंरूपं सा
मान्यतो देहसौष्ठवं तयोर्निलयः निवासस्थानं प्रथितो विख्यातः प्रतापो यस्य सः ऋणमोचन इति आख्या
संज्ञा यस्य स तथोक्तः हरिः तस्य श्रीलक्ष्मीनारायणस्यांतिके समीपे आस्ते ॥५३॥ मंजीरेति मंजीरयोर्नूपुर

आस्तेऽर्च्चनीयचरणः करुणानिधानं तस्यांतिकेपि महतामृणमोचनाख्यः ॥ दिव्याकृतिर्हरिरुदस्तनमज्जम
नार्त्तिः सौंदर्यसल्लयनिलयः प्रथितप्रतापः ॥५३॥ मंजीरमंडनलसच्चरणारविंदः सौवर्णशृंखलसदूत्तवर
वलग्नः ॥ रत्नोल्लसत्स्फुरत्कुंडलकम्रकर्णो मुक्तावलिप्रमुखचारुकलापकांतः ॥५४॥ योर्मंडने भूषणाभ्
यां लसती राजती चरणारविंदे यस्य सः सौवर्णे हेमरचितें शृंखलं कटिमेखलां यस्य स तत्तथाभूतं रूद्धतरं वर्त्तुल
वर्त्तुलं वरं श्रेष्ठं अवलग्नं मध्यं यस्य सः मध्यमं चावलग्नं चे समरः रत्नैः उल्लसती स्फुरत्सकनकस्य कुंडले यो
स्तौ तथाभूतौ कम्रौ रम्यौ कर्णौ यस्य सः मुक्तावली मौक्तिकहारः प्रमुखं मुख्यं यस्य यांते तथोक्तायेचारवो

रम्याः कलापाभूषणानि तैः कांतो रम्यः हारो मुक्तावली देवच्छंदो सोन्नातयष्टिके समरः ॥५४॥ दोर्भिरिति लक्षि
तैः मनोहरैः प्रवालः पल्लवस्तद्वत् मृदुलाः कोमलास्तैः दीर्घैः आयतैः चतुर्भिः दोर्भिः हस्तैः जलतं शंखं जलजं
स्वपद्मयोरिस्मरः चक्रं च गदां च अंबुजं कमलं च तानि दधत् श्रीमान् नूत्नो भायुक्तो नवीनः सत्तलो योऽम्बुधरो मे
घस्तद्वत् भाकांतिर्यस्य तानि तथोक्तानि अंगानि यस्य स तथोक्तः विस्तीर्णे विशाले दीर्घे आयते नयने यस्य स

दोर्भिर्दधज्जलजचक्रगदांबुजानि दीर्घैः प्रवालमृदुलैर्ललितैश्चतुर्भिः ॥ श्रीमान्नवीनसजलांबुधरप्रभां
गो विस्तीर्णदीर्घनयनस्तरलोत्तमास्यः ॥५५॥ विभ्राजते सवक्षभास्वरचारुवासा दिव्येंद्रनीलमणिसं
हननो मनोज्ञः ॥ चित्रप्रवाहइव नीररुहां रजोभिर्विस्तीर्णतामुपगतैः नामनानुजायाः ॥५६॥ ॥

तरलं भास्करं उत्तमं उत्कृष्टं आस्यं मुखं यस्य स तथोक्तः ॥५५॥ विभ्राजत इति वस्त्रवत् सुवर्णवत् भास्वराणि
प्रकाशमानानि चारूणि वासांसि यस्य स तथोक्तः दिव्यो यइंद्रनीलमणिः नृपाममणिवत् संहननं वपुर्यस्य सः
गात्रं वपुः संहननं शरीरं वर्ष्म विग्रह इत्यमरः मनोज्ञो रम्यः सः हरिः विस्तीर्णतां विस्तारलतां उपगतैः प्राप्तैः नीररुहां क
मलानां रजोभिः चित्रो विचित्रो यन्नामनस्य धर्मराजस्य अनुजाया यमुनायास्ताः प्रवाहइव विभ्राजते विराजते ॥५६॥ 

संतप्तेति संतप्तं शोधितं यत् जांबुनदं कनकं तस्य रम्याः चारवो ये कलापाः भूषणानि तैर्जुष्टं सेवितं युक्तमिसर्थः
नीलानि यानि तसुलानि कंजानि तेषां आवलिः पंक्तिः तस्यां समा द्युतिर्यस्य तत् विशालं विततं यस्य हरेर्वक्षः परभा
गतया गुणोत्कर्षतया हेतुभूतया विद्युतः तडितः मरीचयः किरणाः तैः परिभिन्नो मिश्रितो यो बलाहको मेघस्त
स्य लीलां श्रियं उपैति प्राप्नोति ॥५७॥ तत्रेति गरिष्ठे प्रतिमहति परत्र परस्मिन् तत्र सिंहासने धर्मस्य सूनुः पुत्रः

संतप्तजांबुनदरम्यकलापजुष्टं नीलोत्पलावलिसमद्युति यस्य वक्षः ॥ लीलामुपैति परभागतया विशालं विद्युन्म
रीचिपरिभिन्नबलाहकस्य ॥५७॥ तत्र तिष्ठति परत्र गरिष्ठे धर्मसूनुरतिमंगलकीर्तिः ॥ श्रीहरिस्त्रिदशवादिवमु
क्तवार्द्धिवर्द्धनतुषारमरीचिः ॥५८॥ तप्तहेममयवेष्टनराजन्मौक्तिकादिवरशेखरपंक्तिः ॥ सारभास्वरतरांबरधा
री स्वर्णरत्नमणिजालकलापः ॥५९॥
अतिमंगला कीर्तिर्यस्य सः त्रिदशा देवाः वादवा विप्राः मुक्ताः स्मृताः एव वा
र्द्धिः समुद्रः तस्य वर्द्धने तुषारमरीचिश्चंद्ररूपः श्रीवासुदेवनामविख्यातः श्रीहरिः तिष्ठति ॥५८॥ तप्तेति तप्तं शो
धितं यत् हेमसुवर्णं तन्मयं वेष्टनं शिरः पटः तत्र राजंते सा मौक्तिकादीनां ये वराः श्रेष्ठाः शेखराः तेषां पंक्तयो रा
जयो यस्य स तथोक्तः साराणि श्रेष्ठानि भास्वरतराणि बहुप्रकाशमानानि यानि अंबराणि वासांसि तानि धरती

तितथोक्तः स्वर्णस्रक नकस्रत्ननिमणयस्रुतेषांतालानिवृंदानियेषुतेतथाभूताः कलापाभूषणानियस्य 
 स्मसतथोक्तः तिष्टतीतिपूर्वेणसंबंधः॥५९॥ कालेतिकालात् भीतिर्भयंतस्याः हरणोनिवर्त्तकः रमणीयो
मनोहरः प्राप्तालब्धामानवतनुर्मनुष्यदेहोयैस्तेतैः स्मरणीयः चिंतनीयः तत्स्मरणमेवमानवतनुः फल
मितिभावः अत्रअस्मिन्लोकेमुक्तयेसंसृतिभ्रमणनिवृत्तयेनुःसरणीकरणीयः तदाश्रयमृतेमुक्तिर्नस्या

कालभीतिहरणोरमणीयः प्राप्तमानवतनुस्मरणीयः॥ मुक्तयेत्रनुःसरणीकरणीयः सिद्धमुक्तनिकरस्पृह
णीयः॥६०॥ तत्रबंधुरवपुः सहरभक्त्या धर्मदेवउपलभ्यतदीयम्॥ सन्निधिंवसतिविश्वजनीनोभक्तिनिर्जि
तहरिर्हरितातः॥६१॥ चारुमाल्यवरनूपुरराजिराजितारुणशिरःपटरम्यः॥ बिभ्रदुत्तमतरैर्मृदुलांगैश्चि
त्रविस्फुरदनर्घ्यविभूषाः॥६२॥ इतिभावः सिद्धाः अणिमाद्यैश्वर्यसंपन्नामुक्ताश्चतैः स्पृहणीयः तेषामप्यु
पासनीयइतिभावः॥६०॥ तत्रेतितत्रतस्मिन्सिंहासनेबंधुरंरम्यंवपुर्यस्यसः विश्वस्मैहितइतिविश्वजनीनः
भक्त्यानिर्जितोवशीकृतोयेनसः हरेः तातः पिताधर्मदेवः तस्यवासुदेवस्येदंतदीयंसन्निधिंसमीपंउपलभ्यप्र
भक्त्यासहसार्द्धंवसति॥६१॥ चार्वितिचारूणियानिमाल्यानिपुष्पाणितेषांवराः श्रेष्ठाः नूपुरास्तेषांराजिः 

पंक्तिस्तयाराजितोअरुणोरक्तः शिरःपटः उष्णीषोयस्यसः उत्तमतरैः अत्युत्कृष्टैः मृदुलांगैः कमलांगैः चित्राः विविधाः विस्फुरंतः प्रकाशमानाः अनर्घ्याः अमूल्याः याः विभूषाभूषणानिबिभ्रत् वसतीति
पूर्वेणसंबंधः॥६२॥ स्वर्णेति स्वर्णंहेमरत्नानिचकुसुमानिपुष्पाणिचतेषामवचूलामालिकाः ताभिर्भ्राजमा
नंराजमानंविपुलंविस्तीर्णंआयतंदीर्घंवक्षोयस्यसः चित्राणिनानाविधानिभासुराणिमहाधनानिवस्त्रमूल्या

स्वर्णरत्नकुसुमाद्यवचूलाभ्राजमानविपुलायतवक्षाः॥ चित्रभासुरमहाधनवासाः शांतमंगलमहोमयमूर्तिः॥६३॥
आश्रयंतिकतिचिद्रतिपूर्वंतानिजाश्रितजनान्स्वदभासा॥ वार्द्धितायतभुजांतरतारस्फारहारनिकराश्चहसंति॥६४॥
रोधयंतिनिजमूर्त्तिषुतेषांमानसानिविपुलप्रणयानाम्॥ ताः सुमंगलगिरः प्रवदंतिप्रेक्षणीयकरुणामयनेत्राः
६५॥
निवासांसियस्यसः शांतामंगलामहोमयातेजोमयामूर्त्तिर्यस्यसः॥६३॥ आश्रयंतीतिताः पूर्वोक्ताः मूर्त्तयः कतिचित् निजाः स्वकीयायेआश्रिताजनास्तानूरतिपूर्वंप्रीतिपूर्वंयथातथाआश्रयंतिआकारयं
तिकिंचस्वदभासादंतकांत्यावर्द्धिताः आयतेषुदीर्घेषुभुजांतरेयेताराणांशुद्धमौक्तिकानांसाराः श्रेष्ठाहारा
स्तेषांनिकराः समूहायाभिस्ताः तथोक्ताः संसंहसंति॥६४॥ रोधयंतीति प्रेक्षणीयानिदर्शनीयानि

करुणामयानि नेत्राणि यासां तास्तथोक्ताः ताः मूर्त्तयः विपुलो महान् प्रणयः स्नेहो येषां ते तथोक्तानां
तेषां श्रितजनानां मानसानि मनांसि निजाः स्वकीया या मूर्त्तयस्ताः सुरोधयंति स्थिराणि कुर्वंति तेरिति त्रिशेषः ॥
क्रमंगलाया गिरो वाण्यस्ताः प्रवदंति गदंति ॥ ६५ ॥ भक्ष्याणीति नेत्राणां नयनानां तत्क्षवो ये भ्यस्तानि त
थाभूतानि दिव्यानि अलौकिकानि रूपाणि यासां तास्तथोक्ताः आर्त्तीनां दुःखानां ये निचयाः समूहा
स्तेषां छिदुरः भिदुरः अवलोको दर्शनं यासां ताः ताः मूर्त्तयः निजाः स्वकीयाये भक्तजनास्तैः अर्पिता

भक्ष्याण्यदंति निजभक्तजनार्पितानि क्षीरं पिबंति नयनोत्सव दिव्यरूपाः ॥ गृह्णंति ताः करयुगेन सु
मात्ममालाः केषांचिदार्त्ति निचय छिदुरावलोकाः ॥ ६६ ॥ हरिरधिमहि दुर्गपत्तन श्री नगर मेरवषु वि
धाप्य मंदिराणि ॥ भगवत्तदूहतादृशा निमूर्त्तीर्विधिवदतिष्ठिपदुत्सवेन सार्द्धम् ॥ ६७ ॥ निनिवेदितानि ॥

भक्ष्याणि पक्वान्नानि अदंति भक्षयंति क्षीरं दुग्धं पिबंति अत्र विभक्तिपरिणामेनार्पितत्वाद्दोऽन्वेतव्यः
केषांचित् भक्तजनानां कुसुमात्मानां पुष्पाणां मालाः करयुगेन स्वहस्तयुगलेन गृह्णंति स्वीकुर्वंति
६६ ॥ हरिरिति हरिः श्री हरिः अधिमहि महद्यामि समर्थः विभक्त्यर्थे ऽव्ययीभावः दुर्गपत्तनं च श्री ॥१५॥

नगरं च ते आदिनी मुख्यानि येषां तानि तथोक्तानि तेषु नगरेषु तादृशानि तथाविधानि मंदिराणि विधा
प्यकारयित्वा इह दुर्गपत्तनादि विधा विदितेषु मंदिरेषु भगवतः मूर्त्तीः श्रीगोपीनाथनरनारायणमुख्याः
प्रतिमाः विधिवत् यथाविधि आम्नायप्रणीतविध्यनुसारेण समर्थः उत्सवेन सार्द्धं सह अतिष्ठिपत् प्रति
ष्ठां अदीधपत् पुष्पिताग्राद्वृत्तं लक्षणं त्वं प्राक् ॥ ६७ ॥ इति श्री पद्मावच्चप्रमाणपारावारीणधुरीणविद्व

इति श्री हरिसंभवे महाकाव्ये हर्यंके कवि श्री मदचिंत्यानंदवर्णिकृते सिंहासनादिवर्णननामैकोनविंशः
सर्गः ॥ १९ ॥

नाथभट्टात्मजदीनानाथभट्टशिष्यश्री ब्रह्मक्षत्रास्यदेवश्री सहजानंदस्वामिचरणकमलोपासकगोपा
लानंदमुमुक्षोः प्रेरितमतिमाशावदंकदयान्वितकरणत्रश्री हरिकृष्णैकभक्तभोलानाथकृतो श्री हरिसंभ
वस विद्वज्जनाह्लादिमाख्य व्याख्यायामेकोनविंशः सर्गः ॥ १९ ॥ श्री सहजानंदायनमो नमः ॥ श्री ॥
लि॰ रावलजेरामो राखजी सवत् १९५६ ना फागण शु २ बुधवासरे मेंथाण ग्रामे ब्रह्मसंप्रमाणे लिख्युं छे